ॐ

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला – पंचदश पुष्प

# वास्तुशास्त्रविमर्श

सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका




श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
( केन्द्रीयविश्वविद्यालयः )
नवदेहली-110016

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला-पंचदश पुष्प

# वास्तुशास्त्रविमर्श

सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका
( विश्वविद्यालय अनुदान आयोग के केयर लिस्ट में सम्मिलित )

प्रधान सम्पादक
**प्रो. मुरलीमनोहर पाठक**
कुलपति

सम्पादक
**प्रो. देवीप्रसाद त्रिपाठी**
आचार्य एवं अध्यक्ष

वास्तुशास्त्र विभाग
**श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय**
(केन्द्रीय विश्वविद्यालय)
नव देहली-110016

Scanned with CamScanner

प्रकाशक -
**वास्तुशास्त्र विभाग**
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय
(केन्द्रीय विश्वविद्यालय)
कुतुब सांस्थानिक क्षेत्र, नव देहली-110016
**ISSN :- 0976-4321**

© प्रकाशक

संस्करण - 2022
मुद्रण वर्ष - 2023

मूल्य 200/-

प्रकाशक की लिखित पूर्वानुमति के बिना इस ग्रन्थ के किसी भी अंश का अनुवाद या किसी भी रूप में उपयोग करना सर्वथा वर्जित है। शोधलेखों में लेखकों के स्वयं के विचार हैं। शोधलेख में किसी भी प्रकार का विवाद होने पर शोधलेखक स्वयं उत्तरदायी रहेगा।

मुद्रक:
**गणेश प्रिंटिग प्रेस**
दिल्ली-110016
फोन : 9811663391/93

# वास्तुशास्त्रानुसार जीर्णोद्धार फलप्राप्ति

डॉ. दीपक वशिष्ठ
जीवन जोशी

भारत की पवित्र भूमि और उस पर शास्त्रीय विमर्श द्वारा निर्मित होने वाले भवन, देवालय, दुर्ग, कूप, तड़ाग आदि एक समृद्ध गौरवमयी गाथा लिखते हैं। भारत की निर्मल भूमि वस्तुतः तपस्वी साधकों की श्रेष्ठ भूमि है जहाँ पर कालजीवी ज्योतिषी और योगीजन ग्रह, नक्षत्र, तिथि, वार आदि के अद्भुत संयोग को ध्यान में रखकर एक दिव्य और भव्य भवन, देवालय, दुर्ग, कूप, तड़ाग आदि के विनिर्माण को अत्यन्त चेतना से पूरित करने में सक्षम हैं। भारत की इस विशुद्ध भूमि में वो चाहे मरुयुक्त हो या तुङ्ग पर्वतयुक्त प्रत्येक स्थल पर वास्तुशास्त्र मर्मज्ञ अपनी तीक्ष्ण परीक्षण विधि से भूमि शुद्धि कर एक विशाल और चिरस्थायी भवन, देवालय, दुर्ग, कूप, तड़ाग आदि का निर्माण करते हैं। वस्तुतः भारत के विविध शास्त्रों के ज्ञाताओं की विवेकशीलता मनीषा भूमि शोधन, भूमि पर निर्माण योग्य खण्ड की योग्यता को सम्यक् रूप से जानती है। यही कारण है कि भारत की पवित्र सप्तपुरिया[1] सनातन धर्म-दर्शन-ज्ञान-विज्ञान की आज तक साक्षी हैं और हमारी पीढ़ियों को प्राचीन भारत की विशद गौरव गाथा से परिचित कराने में सर्वातोदृशा समर्थ है। यही कारण है की भारतीय वास्तुशास्त्र मानव संस्कृति की उत्कृष्ट और भव्य अभिव्यक्ति है जिसका संरक्षण हमारे महनीय ग्रन्थ और महान शिल्पविद्या के प्रकाण्ड विद्वान् आज तक करते आ रहे हैं।

भारत की देवालय रूपी भूमि और भारत की अनन्त ज्ञान की परम्परा वस्तुतः कोटिशः भारतीयों की आध्यात्मिक सम्पत्ति है। अथर्ववेद के बारहवें काण्ड में वर्णित पृथ्वी सूक्त में कहा गया है कि यह मेदिनी माता भूत-भविष्य की पालक और सुख दाता है तथा यह पृथिवी सम्पूर्ण विश्व का भरण करती है-

**सत्यं बृहदृतमुग्रं दीक्षा तपोब्रह्म यज्ञः पृथिवीं धारयन्ति।**
**स नो भूतस्य भव्यस्य पत्न्यूरुंलोकं पृथिवी नः कृणोतु॥[2]**
**विशवम्भरा वसुधानी प्रतिष्ठाहिरण्यवक्षा जगतो निवेशनी।**
**वैश्वानर बिभ्रती भुमिरग्निमिन्द्र ऋषभा द्रविणे नो दधातु॥[3]**

अतः पवित्र भूमि पर निर्मित होने वाले वास्तुशास्त्रानुसार आवासीय भवनों में सदा

---

1 अयोध्यामथुरामायाकाशीकांचीत्वन्तिका, पुरी द्ववारावतीचैव सप्तैते मोक्षदायिका:।

2 अथर्ववेद, पृथ्वी सूक्त-1

3 अथर्ववेद, पृथ्वी सूक्त-6

National Journal of
Hindi & Sanskrit Research

# National Journal of Hindi & Sanskrit Research

**Online, Peer Reviewed Journal, Impact Factor ( RJIF ): 5.11, ISSN NO. : 2454-9177**

## *Publication Certificate*

**This certificate confirms that " शीतल कश्यप, डॉ दीपक वशिष्ठ " has published article titled " चतुर्दशप्रासादजातयः ".**

Details of Published Article as follow:

Volume : 50

Issue : September-October

Year : 2023

Page No. : 14-17

Yours Sincerely,

**Anil Aggarwal**
Publisher
National Journal of Hindi & Sanskrit Research
Web: www.sanskritarticle.com

National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(50): 14-17
© 2023 NJHSR
www.sanskritarticle.com

**शीतल कश्यप**
शोधच्छात्राः,वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविश्व-
विद्यालयः, नवदेहली

शोध निर्देशक
**डॉ दीपक वशिष्ठ**
सहायकचार्य,वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविश्व-
विद्यालयः, नवदेहली

**Correspondence:**
**शीतल कश्यप**
शोधच्छात्राः,वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविश्व-
विद्यालयः, नवदेहली

# चतुर्दशप्रासादजातयः

**शीतल कश्यप, डॉ दीपक वशिष्ठ**

भारतीयवास्तुविद्यानुसारेण देवमन्दिर-प्रासाद-देवस्थान-देवागार-हर्म्यादयः मन्दिरस्य पर्यायवाचिनः शब्दा आसन्।[1] मन्दिराणि अस्माकं धार्मिकास्थायाः केन्द्राणि सन्ति। भारतीयधर्मेषु देवतायै समर्पितं स्थानं मन्दिरम् इत्युच्यते, यत्र देवस्य मूर्तिं स्थापयित्वा तत्पूजनं क्रियते। मन्दिराणां निर्माणं गुप्तकालस्येति मन्यते।[2] पूर्वं मन्दिराणि काष्ठतृणयोः निर्मितानि आसन्, तदनन्तरं मन्दिराणां पुनर्निर्माणं कृतम्। एते प्रासादाः लम्बायमानाः, उत्रताः, प्रसृताः नैकभूमिनां पाषाणस्य इष्टिकादीनां वा साहाय्येन निर्मीयन्ते। येषु नैकेश्रङ्ग-श्रृङ्खला-अण्डकादयो भवन्ति तथा च अनेके गवाक्षाः भवन्ति। एवमेव तेन सह तत्र त्रिकोणचतुष्कोणानाम् आयताकाराः वृत्तकाराः वा शिलाः भवन्ति।

यदि प्रासादानां निर्माणं कस्यापि पुण्यनद्याः तीरे, सिद्धपुरुषस्याश्रमे तीर्थे नगरे ग्रामे वा पर्वतेषु गुहायां सरोवरतीरे च करणेन पुण्यप्राप्तिः, पापनाशः मोक्षप्राप्तिश्च भवतीति।[3]

**श्रृङ्गः** – श्रृङ्गः शिखरं वा मन्दिराणां गर्भगृहस्योपरि या त्रिकोणाकारा {शुण्डाकारा} संरचना भवति, तदेव श्रृङ्गः शिखरं वा भवति।

**श्रृङ्खला** - यदेकस्य शिखरस्योपर्यपरस्य शिखरस्य निर्माणं क्रियते चेत्सा श्रृङ्खला भवति।

**अङ्क** - लघुशिखराकारा अण्डका अङ्कशब्देन कथ्यन्ते।

**गर्भगृहम् मण्डोवरश्च** - प्रासादपीठस्योपरि गर्भगृहं मण्डोवरं वा निर्मीयते। मण्डोवरं वस्तुतः प्रासादस्य उदयभागः उच्यते। मण्डस्यार्थोऽस्ति - यो भागः पीठस्योपरि निर्मीयते तदेव मण्डोवरमिति नाम्ना अभिधीयते। यत्र गर्भगृहे प्रतिमाः प्रतिष्ठाप्यन्ते, यत्र च अल्पप्रकाशो भवति तत्स्थानं गर्भगृहं मण्डोवरं वा कथ्यते।

एषां मन्दिराणां तिस्रः शैल्यः प्रसिद्धाः भवन्ति -

1. नागर 2. द्राविड़ 3. बेसरः

**नागरशैली**- अस्याः शैल्याः प्रसारः हिमालयपर्वतादारभ्य विन्ध्यपर्वतं यावत् द्रष्टुं शक्यते। नागरशब्दः नगरशब्दात् निष्पन्नः। सर्वप्रथमं नगरोत्पन्नत्वात् तस्य संज्ञा नागर इति वर्तते।

**द्राविडशैली** - अस्याः शैल्याः विकासः भारतदेशस्य द्रविडक्षेत्रे सञ्जातः, तस्मादियं द्राविडशैली कथ्यते। अस्याः आधारः समचतुरस्रो भवति। दक्षिणे भौगोलिकदिशा कृष्णायाः तुङ्गभद्रायाः वा कुमारी-अन्तरीपपर्यन्तं द्राविडशैलीमन्दिराणि निर्मितानि सन्ति।।

**बेसरशैली** - इयं शैली नागर- द्राविडयोः मिश्रणरूपा अस्ति। अस्याः विन्यासः द्राविडशैलीवत् तथा च रूपं नागरशैलीवद् भवति। अस्याः शैल्याः मन्दिराणि विन्ध्य-पर्वतमालायाः कृष्णानद्याः तटे निर्मितानि सन्ति। आरम्भिकविकासेन सदैव तिसृणामेतासां शैलीनां साहाय्येन प्रासादनिर्माणं यत्र-तत्र सञ्जातम्।[4]

अस्मिन्नवाधारे शिल्पशास्त्रस्य विकासः गुप्तकाले गुप्तोत्तरकाले च मन्यते। प्रारम्भिकमान्यतानुसारेण देवालयानां रचना मानवयष्टिवदेव कृता वर्तते। तदुक्तम् -

**प्रासादो देवरूपः स्यात् पादौ पादशिलास्तथा।**
**गर्भश्चैवोदरं ज्ञेयं जङ्घा पादोर्ध्वमुच्चते।।**
**स्तभाश्च जानवो ज्ञेया घण्टा जिह्वा प्रकीर्तिता।**
**दीपः प्राणरूपो ज्ञेया ह्यपाने जल निर्गतः।**
**ब्रह्मस्थानं यदैतच्च तन्नाभिः परिकीर्तिता।**
**हर्दयं पीठिका ज्ञेया प्रतिमा पुरुषः स्मृतः।।**
**पादचारस्त्वहंकारो ज्योतिस्तच्चक्षुरुच्यते।**
**तदूर्ध्वं प्रकृतिस्तस्य प्रतिमात्मा स्मृतौ बुधैः।।**
**तलकुभांदधोद्वार तस्य प्रजननं स्मृतम्।**
**शुकनासा भवेन्नासा गवाक्षः कर्ण उच्यते।।**
**कायापाली स्मृतः स्कंधे ग्रीवा चामलसारिका।**
**कलशस्तु शिरो ज्ञेयो मज्जादित्पर संयुतं ।।**
**मेदश्च वसुधा विद्यात् प्रलेपो मासमुच्यते।**
**अस्थिनो च शिलास्तस्य स्नायुकीलादयः स्मृताः।।**
**चक्षुषि शिखरास्तस्य ध्वजाकेश प्रकीर्तिताः ।**
**एव पुरुपरूपं तु ध्यायेच्च मनसा सुधीः।।**[5]

शिल्पग्रन्थेषु भारतीयप्रदेशेषु प्रवर्तमानाः प्रासादस्य चतुर्दशजातयः कथिताः सन्ति। क्षीरार्णवे, अपराजितपृच्छायां, वास्तुमञ्जर्यां, प्रासादमण्डने पञ्चदशमाशताब्द्याः- षोडशतमशताद्याः ग्रन्थेषु शिल्पकारैः तासां सुन्दरस्वरूपेण वर्णनं कृतमस्ति। महाराणाकुम्भाराज्यकाले एतादृशानाम् अनेकानां प्रासादानां जीर्णोद्धारो निर्माणञ्च कारितम्। येषां वर्णनं सूत्रधारमण्डनेन तद्भ्रात्रा सूत्रधारेण नाथमहोदयेन च स्वग्रन्थेषु प्रतिपादितानां प्रासादजातीनां वर्णनं कृतमस्ति।

विश्वकर्माऽपि एतासां प्रासादजातीनां विषये प्रोक्तवान् यत् हिमालये दण्डीनामकमेकं दारुवनमस्ति यत्र सर्वैः देवैः सर्वैः दानवैश्च मिलित्वा गीतवाद्यैः सह भगवतः शङ्करस्य प्रार्थना पूजा च कृता तथा च ते मिलित्वा तत्र चतुर्दशविधानां प्रासादानां निर्माणं कृतवन्तः।

**प्रासादाकारपूजाभिर्देव-दैत्यादिभिः क्रमात्।**
**चतुर्दशसमुत्पन्नाः प्रासादानां सुजातयः।।**[6]

1. देवपूजनेन नागरजातिः
2. दानवपूजनेन द्राविडजातिः
3. गन्धर्वपूजनेन लातिनजातिः
4. यक्षपूजनेन विमानजातिः
5. विद्याधराणां पूजनेन मिश्रजातिः
6. वसुदेवानां पूजनेन वराटकजातिः
7. नागदेवानां पूजनेन सान्धारजातिः
8. नरेन्द्रपूजनेन भूमिजजातिः
9. सूर्यदेवपूजनेन विमानजातिः
10. चन्द्रपूजनेन विमान-पुष्पकजातिः
11. पार्वतीपूजनेन वलभीजातिः
12. हरसिद्धादीनां देवीनां पूजनेन सिंहावलोकनजातिः
13. व्यन्तरदेवानां पूजनेन फांसीजातेः प्रासादाः
14. इन्द्रलोकदेवानां पूजनेन रथारूहजातेः प्रासादाः

विश्वकर्मानुसारेण तासु प्रासादस्याष्टौ जातय उत्तमाः मन्यन्ते, याः सर्वदेवानां कृते उत्तमाः सन्ति। यासु भगवतः शङ्करस्य कृतेऽयं प्रासादः श्रेष्ठो मन्यते। ता एवं सन्ति – 1.नागरः, 2. द्राविडः, 3. भूमिजः, 4. लतिनः, 5.सन्धारः, 6. विमाननागरः, 7.पुष्पकाङ्किता, 8. मिश्रजातिः।

**नागराः द्राविडाश्चैवभूमिजा-लतिनास्तथा**
**सान्धारा-विमानादिनागराः पुष्पकाङ्किताः।।**
**प्रासादमिश्रकाश्चैवमष्टौ जातिषु चोत्तमाः।**[7]

**१. नागरजातिः-** विश्वकर्मानुसारेण ब्रह्मादिभिरनेकैः देवैरपि देवदारुवने नन्दा-भद्रा-जया-रिक्ता-पूर्णातिथिपर्यन्तं पूजा कृता। यस्मिन् पञ्चमीतिथिपर्यन्तमयं प्रासादो नागरशैल्याः मन्यते। यद्दर्शनेन एवं प्रतीयते - एतदुपरि गजाश्वनरापीठानि, पूर्णालङ्कारि मण्डोवरं, छाद्यं, छाद्यशिरसि श्रृङ्ग-उरुश्रृङ्ग-प्रत्याङ्ग-तवाङ्ग-तिलक-मूल-मञ्जरी एवञ्च दलविभक्त्या प्रकटी भवन् नैकाण्डकसमूहरचितानि शिस्तबद्धानि शिखराणि, शिखरयुक्तस्कन्धस्य शिरस्यामलसारः, कलशयुक्तरङ्गमण्डपं गूढमण्डपं तदुपरि फासना या च सुवर्णयुता भवति। नागरजातेः अन्ये पञ्चभेदाः भवन्ति-

**१. वैराज्य** - अस्य प्रासादस्याकारः चतुरस्रो भवति। वर्णश्चास्य श्वेतो भवति।

**२. पुष्पकः**- पुष्पकप्रासादस्याकारः लम्बचतुरस्रो भवति।

**३. कैलाशः-** कैलाशप्रासादः वृत्ताकारः गोलाकारो वा भवति। अस्य वर्णः सुवर्णो भवति, अयञ्च सर्वरत्नैः विभषितो भवति।

**४. मणिपुष्पकः-** मणिपुष्पकप्रासादस्याकारः वृत्तायतः अर्थात् लम्बगोलो भवति यस्य च रूपं हरितवर्णीयं भवति।

**५. त्रिविष्टपः**- अस्य प्रासादस्याकारः अष्टभुजावान् अष्टक्षोऽष्टभुजो वा भवति। अयमपि सर्वरत्नैर्भूषितो भवति, अनेन सर्वाः कामनाः पूर्णाः भवन्ति, अस्य १८८८ भेदाः वर्तन्ते।

**२. द्राविडः** - दक्षिणपद्यस्य वास्तुग्रन्थेषु द्राविडजातेः षड्वर्गाः कथिताः। तदनुसारेण १. अधिष्ठानम् (पीठम्), २. स्तम्भयुक्तं मण्डोवरम्, ३. प्रस्तरः (वराडिका तथा छाद्यः), ४. चुलिका (आमलक च चद्रिका कर्परी पद्मपत्रम्), ५. स्तूपिका (कलशः) यत्र प्रासादे एतावदङ्गानि भवन्ति स एव प्रासादः द्राविडजातेः प्रासादः मन्तव्यः।

अपराजितपृच्छानुसारेण द्राविडजातेः पञ्चभेदाः भवन्ति। १.स्वस्तिकः, २. सर्वतोभद्रम्, ३. वर्धमानः, ४. सूत्रपद्मा, ५.महापद्मः च एतेषां पञ्चभेदानां क्रमेण शतभेदाः द्विशतभेदाः, त्रिशभेदाः, चतुश्शतभेदाः, पञ्चशतभेदाश्च एवं क्रमेणाहत्य पञ्चदशशतभेदाः भवन्ति, परन्त्वेतेषां स्पष्टीकरणं न प्रदत्तमस्ति।

**३.भूमिजः** - भूमिजप्रासादेषु नैकानि द्वाराणि तलदर्शनमष्टभद्रे अष्टकर्णे वृत्तसंस्थाने वा निर्मीयन्ते, पीठं मण्डोवरञ्च नागरवदेव भवन्ति, किन्तु शिखरप्रकृतौ भिन्नताकारणेन तेषां शिखरस्य रेखाः नागरवदेव भवन्ति किन्तु रेखायान्तु श्रृङ्गयुताः भवन्ति। शिखरस्य कर्णोपरि प्रतिरथः तथा रथस्योपाङ्गे द्वौ त्रयो वा श्रृङ्गा उत्तरोत्तरं स्थाप्यन्ते। भद्रे लता-मालारूपेण कृष्यते। स्कन्धे ग्रीवा, घटा, पद्म, छत्रम् चद्रिकायुक्तञ्चामलकं भवति। तस्योपरि कलशो भवति। भूमिजजातेः प्रासादाः मालवप्रदेशे महाराष्ट्रप्रदेशे च दृश्यन्ते।

**४.लतिनः-** लतिनप्रासादस्य शिखराणि जालाकृतलताभिः निर्मातानि भवन्ति। अनेतरेखायुक्त- वेणुकोपेन वृद्धाकारं भवन् श्रृङ्गाश्रृङ्गरहितः एकः अमलसारकलशयुक्तो भवति। लतिनप्रासादरेखायाः विस्तारेण समानं तथा स्वापेक्षया (१_४^१) उदयस्य स्कन्धपर्यन्तं भवन्ति। यस्य स्कन्धे आमलसारको भवति। तस्याङ्कस्याधो ग्रीवायां चन्द्रिका भवति। शिखरस्याधोभागस्य विस्तारस्य दशविभागं कृत्वा ५ तः ६ भागं यावत् स्कन्धस्य विचारो भवति।

**वराटजातिः-** एतादृशेषु प्रासादेषु भूमिकायुक्तश्रृङ्गैः नैकरेखायुक्त-श्रृङ्गवत् प्रतिरथभद्रप्रतिभद्रयुक्तो मदारः पुष्पिका घण्टायुतश्चेतानि वराटजातेः लक्षणानि भवन्ति।

अपराजितकारेणास्याः जातेः पञ्चभेदाः प्रोक्तास्सन्ति - १. वराट्, २. पुष्पकः, ३. श्रीपुञ्जः, ४. सर्वतोभद्रः ५. सिंहश्च एषां भेदानां पुनः १२०२ अवान्तरभेदाः कथिता वर्तन्ते।

**विमानजातिः-** चतुरस्रतलाः, रथोपरथयुक्ताः, भद्रोपाङ्गवन्तः प्रासादाः विमानजातिप्रासादाः कथ्यन्ते। विमानजातेः पञ्चभेदा-स्सन्ति।

**१. विमानः** , २. गरुडः, ३. ध्वजः, ४. विजयः, ५. गन्धमादनः च, एतेषु प्रत्येकं पुष्पमालायाः आकारवत् लता- श्रृङ्गवन्तः ज्ञातव्याः। तेषां क्रमेण ३००, ४००, ५००, ६०० तथा ७०० भेदाः भवन्ति। एवमाहत्य पञ्चविंशति-शतभेदाः भवन्त्यस्याः जातेः।

**मिश्रजातिः**- एतादृशाः प्रासादाः नागरछन्दसोऽनेकतिलकैः शोभिताः मिश्रछन्दसः प्रासादाः ज्ञातव्याः। इमे अनेकाकार-रूपवन्तो भवन्ति।

**सावंधारा जातिः**- येषु प्रासादेषु गर्भगृहे प्रदक्षिणामार्गः स्यात् सः सान्धाराः कथ्यते। एतादृशेषु प्रासादेषु अत्यल्पप्रकाशो भवति, येनैते सान्धाराः कथ्यन्ते। तादृशेषु प्रासादेषु निराधारः प्रासादः कथितोऽस्ति। एतादृशाः प्रासादाः गुर्जरप्रदेशे राजस्थाने, मेवाड़े, मध्यप्रदेशस्य खजुराहो प्रदेशेऽपि वर्तन्ते। सोमनाथमन्दिरस्य महाप्रासादोऽपि सान्धारजातेरेव वर्तते।

**विमाननागरः-** नागरस्योपरि छन्दयुक्तः लताश्रृङ्गः स्यात्, तादृशः प्रासादः विमाननागरो भवति।

**विमानपुष्पकः-** विमाननागरे छन्दसः ऊर्ध्वशिखरे पुष्पकवद् उन्नतश्रृङ्गो भवति। एतादृशप्रासादः सर्वकामनाप्रदो भवति।

**वलभी-** वलभीजातेः प्रासादाः लतिननागरादपि प्राचीनजातेः प्रतीयन्ते। सौराष्ट्रे गुप्तोत्तरकाले कदवारप्रभासस्य समीपं तथा च पोरबन्दरद्वारिकयोः मध्ये हर्षदमातुः स्थाने कतिपयवलभीप्रासादाः सन्ति।

**फांसनाः-** फांसनाप्रासादः नपुंसकलिङ्गकाः कथ्यन्ते। एतादृशानां प्रासादानां तलदर्शनं हस्ताङ्गुलोपाङ्गयुक्तं केवलं कर्णरेखायुक्तं विशिष्टं भवति। इयं शैली गर्भगृहे मण्डपफांसनाकरणस्यपद्धत्यनन्तरं प्रविष्टा। गुजरातदेशे सौराष्ट्रे च शिल्पिनः फांसनाजातिः (तरसटियु) कथ्यते। सा "त्रिषट्" इत्यस्यापभ्रंशो वर्तते। कोणार्कस्य मण्डपेषु फांसना दृश्यते। सामान्यतः बहुत्र फांसनामन्दिराणि भवन्ति। भारतस्य प्रत्येकस्मिन् प्रदेशे सामान्यरूपेण फांसनाकाराणि मन्दिराणि दृश्यन्ते।

**सिंहावलोकनः-** यः छाद्योत्पन्नः, यस्योपरि सिंहाकृतिः एवञ्च घण्टाकृतिः वर्तते सः प्रासादः सिंहावलोकनः कथ्यते।

**रथारुहः-** नागरछन्दसोद्भूतः, त्रिचक्राकृतिः, सकलकामनापूरकः प्रासादः रथारुहप्रासादो भवति। अपराजितकारेण दारुकर्मणोद्भू-तत्वात् सिंहावलोकनप्रासादसमत्वाच्च एतद्रथारुहप्रासादः कथितः।[8]

एतासां चतुर्दशप्रासादजातीनां प्रमाणं भारते पृथक्-पृथक् स्थानेषु प्राप्यते। कासाञ्चनजातीनां प्रासादानां परिचयः न्यूनमात्रायां प्राप्यते। किन्तु जावा, सुमात्रा, अनामः (चन्दा) कम्बोड़िया, सियामादिषु भारतस्य बृहत्प्रदेशेष्वेतासां जातीनां प्रासादाः निर्मितास्सन्ति। एषां निर्माणं नैकराजभिः कृतः येनैतेषां शैलीषु परिवर्तनमप्यभूत्। यद् काश्चन शैल्यः नष्टाः सञ्जाताः याः अद्यापि सन्ति ताः भारतीयशिल्पकलायाः प्रत्यक्षोदाहरणानि सन्ति तथा यासामद्यापि जीर्णोद्धारः क्रियमाणोऽस्ति।

केचन तादृशाः प्रासादा अपि सन्ति ये शिल्पकलायाश्च विशिष्टं चित्रं प्रस्तुवन्ति। तस्मिन् समये चित्रकला, शिल्पकला, वास्तुकलाश्च अद्भुताः आसन्। तत्समस्य प्रासादानां कानिचन उदाहरणानि एवं सन्ति - कोणार्कस्य सूर्यमन्दिरं, विश्वनाथमन्दिरं, खजुराहोमन्दिरं, जगन्नाथपुरीमन्दिरं,बृहदीश्वरमन्दिरं (तञ्जावुर) इत्यादिनी मन्दिराणि विभिन्नशैलिभिः निर्मितानि, शिल्पकलायाः उच्चस्तरभूतानि सन्ति

तथा च ग्रन्थेष्वपि प्रोक्तमस्ति यद् यः एतादृशानां प्रासादानां निर्माणं कारयति तस्मै धर्मार्थकाममोक्षाणां प्राप्तिर्भवति। अतः यावदपि मन्दिराणां (प्रासादाः) निर्माणमभवत् तत्सर्वमपि राजभिरेव कारितमस्तीति।

**एते चतुर्दशविख्याताः प्रासादजातयः स्मृताः।**
**मृत्साकाष्टेष्टकाशैलधातुरत्नभवाः सुधीः॥**
**कुर्यात् स्वशक्तिप्रासादश्चातुर्वर्गफलं भवेत्।**
**पांसुनादि सुरागारे क्रीड्या विहितश्रितः।।**[9]


**सन्दर्भ ग्रन्थः -**

1. कौटिल्य अर्थशास्त्र अ.९ वास्तु वि.क्र.काशिका-२६
2. प्रासादमण्डन पृ॰-२
3. क्षिरार्णव अ॰-पृ॰-१-७
4. प्रासादमण्डन पृ. 2/3
5. क्षीरार्णव अ.1 श्लोक. 2-9
6. प्रासादमण्डन पृ.- 23, श्लोक. 6
7. प्रासादमण्डन पृ. 23, श्लोक- 7
8. क्षीरार्णव पृ. 12-13
9. क्षीरार्णव अ.1, श्लोक. 12-13

National Journal of
Hindi & Sanskrit Research

# National Journal of Hindi & Sanskrit Research

**Online, Peer Reviewed Journal, Impact Factor ( RJIF ): 5.11, ISSN NO. : 2454-9177**

## *Publication Certificate*

**This certificate confirms that “ शीतल कश्यप, डॉ दीपक वशिष्ठ ” has published article titled “ वास्तुपदविन्यासः ”.**

Details of Published Article as follow:

Volume : 49

Issue : July – August

Year : 2023

Page No. : 31-34

Yours Sincerely,

अनिल अग्रवाल

**Anil Aggarwal**
Publisher
National Journal of Hindi & Sanskrit Research
Web: www.sanskritarticle.com

National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(49): 31-34
© 2023 NJHSR
www.sanskritarticle.com

**शीतल कश्यप**
शोधच्छात्राः,वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविश्व-
विद्यालयः, नवदेहली

**शोध निर्देशक**
**डॉ दीपक वशिष्ठ**
सहायकचार्य,वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविश्व-
विद्यालयः, नवदेहली

**Correspondence:**
**शीतल कश्यप**
शोधच्छात्राः,वास्तुशास्त्रविभागः,
श्रीलालबहादुरशास्त्रीसंस्कृतविश्व-
विद्यालयः, नवदेहली

# वास्तुपदविन्यासः

**शीतल कश्यप, डॉ दीपक वशिष्ठ**

वास्तु' इति शब्दः 'वस्' धातोः 'तुण्' प्रत्यये कृते निष्पद्यते। यस्यार्थो भवति वसनं निवासकरणम् अर्थात् प्राणिनां निवासस्थानं वास्त्विति निगद्यते[1], आचार्यकौटिल्येनार्थशास्त्रे उल्लिखितं यत् गृहस्य क्षेत्रम्, वाटिका, सेतुः, सरिद्बन्धः, सर्वविधानि भवनानि, तडागं पुष्पकारिण्यादीनि सर्वाणि वास्तुपदेन संसूच्यन्ते।[2]

एवमेव समराङ्गणसूत्रधार-मानसार-मयमतंप्रभृतिषु ग्रन्थेषु देवानां मनुष्याणां च निवासस्थलं वास्तुपदेन निगदितं वर्तते। एतदतिरिच्य भवननिर्माणे प्रमुण्य मानानां वस्तूनां तथा च मनुष्यो येषां वस्तूनां उपभोगः स्वसुखार्थं करोति, तेऽपि वास्त्विति सञ्ज्ञयावगम्यन्ते।[3] एवमेव अन्येषु ग्रन्थेषु वेदेषु च 'वास्तु' इति पदस्य प्रयोगो भवनार्थं गृहार्थं च कृतोऽस्ति।

वास्तुशास्त्रे भवनयोजनानिर्माणात् पूर्वं निर्धारिते क्षेत्रे वास्तुपुरुषस्य स्थापना क्रियते। स्थापनेयं मण्डलरूपेण भवति। अस्य मण्डलस्य तादात्म्यं भूम्या सह स्थाप्यते वास्तुपदविन्यास एव वास्तुपदमण्डलं निगद्यते। अतः वास्तुपुरुषस्य कल्पना सम्पूर्णेऽस्मिन् भूखण्डे क्रियते। अस्यां परिकल्पनायां भूखण्डस्य चतस्रो दिशाः उपदिशा निर्धारितं कृत्वा वास्तुपुरुषः चित्रयते। वास्तुपुरुषस्य शयनावस्था वर्तते। अस्य शिरउत्तरपूर्व पादौ च दक्षिणपूर्वे स्तः। अयं रक्ष(असुर) जातीयो वर्तते। यस्योत्पत्तिः भगवतः शिवात् मन्यते। पुराणादिषु ग्रन्थेषु अस्य वर्णनं प्राप्यते। वास्तुपुरुषस्य उत्पत्तेः सम्पूर्णं वृत्तान्तं मत्स्यपुराणे उल्लिखितं वर्तते। सूत्रधारमण्डनकृते राजवल्लभवास्तुशास्त्रग्रन्थे कथेयं साङ्क्षिप्तरूपेण प्राप्यते। यथैवम्-

**वास्तुपुरुषस्योत्पत्तिः-**

पुरा अन्धकाख्येन राक्षसेन सह युद्धमानस्य भगवतः शिवस्य वपुसः स्वेदबिन्दुरेकः भूमौ आपतितः येन भयप्रदस्यैकस्य प्राणिन उत्पत्तिः सञ्जाता। देवाः तं अधोमुखं कृत्वा भूमौ निपातितवन्तः तथा च तस्मिन् दृढेन उपविष्टवन्तः। तं प्राणिनमेव कालान्तरे वास्तुसंज्ञाया परिलक्ष्यन्ते। अयं वास्तुपुरुषः शयितो वर्तते। तस्य पादौ नैर्ऋत्यकोणे द्वे एव पादतले युक्ते स्तः। सुषुप्तावस्थायां तस्य शिरः ईशानकोणे कफोणी जानुसन्धी च आग्नेयवायव्यकोणयोः स्थितास्सन्ति।[4] ४५ देवताः तस्य अधोमुखवास्तुपुरुषस्य देहे निवसन्ति तथा च देव्यः बहिः। एवं ५३ देवैः सह स वास्तुनाम्ना लोकप्रसिद्धो जातः।[5]

**ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुषष्टिकैः।**
**एकाशीतिपदैः समस्तभवने जीर्णे नवाब्ध्यंशकैः।।**
**प्रासादेऽथ शतांशकैस्तु सकले पूज्यास्तथा मण्डपे।**
**कूपे षण्णवचन्द्रभागसहिते वापी तडागे वने।।**[6]

अस्य वास्तुपुरुषस्य परिकल्पना शयनावस्था रूपेण क्रियते यस्य शिर उत्तर-पूर्वे पादौ -दक्षिण-पश्चिमे मध्ये च ब्रह्मणो वासोऽस्ति। वास्तुपुरुषेण घोरतपस्यां कृत्वा महादेवशङ्करात् वरः प्राप्तः यत् यो देवो मनुष्यो वा वास्तुपुरुषे निवत्स्यति स वास्तुपूजनमपि सम्पादयिष्यति, अन्यथा तत्रासुरा

निवत्स्यन्ति। अतएव सूत्रपात-शिलान्यास-द्वार-वंशरचना-प्रवेश-शान्तीत्येषु पञ्चकर्मसु वास्तुपूजनमवश्यमाचरणीयम्।[7]

**वास्तुपुरुषाङ्गेषु देवानां स्थितिः-**

नेकेषु ग्रन्थेषु वास्तु पुरुषस्याङ्गेषु पञ्चचत्वारिंशत् देवानां स्थितिः तथा च तद्बहिः स्थितदेवानां विषये वर्णनं प्राप्यते। प्रत्येकं देवता भिन्नां विशिष्टाञ्च ऊर्जां ददाति।

**ईशो मूर्द्धनि पर्जन्यो दक्षिणं कर्णमाश्रितः।**
**जयः स्कन्धे महेन्द्राद्याः पञ्च दक्षिणबाहुगाः।।**
**महेन्द्रादित्यसत्याश्च भृश आकाशमेव च।**
**बाह्निर्जानुनि पूषाद्याः सप्तपादनली स्थिताः।।**
**पूषाथ वितथेच्श्रैव गृहक्षते यमस्तथा।**
**गन्धर्वो भृङ्गराजश्च मृगाः सप्त सुरा इति।।**
**पादयोः पितरस्तस्मात् सप्त पादनली स्थिताः।**
**दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः।।**
**असुरशोषयक्ष्माणौ रोगो जानुनी संस्थितः।**
**नागो मुख्यश्च भल्लाटः सोमशैलश्च बाहुगा।।**
**अदितिः स्कन्धदेशस्य वामकर्णे दितिः स्थिताः।**
**द्वात्रिंशद् बाह्यगा देवा नाभिपृष्ठे स्थितो विधिः।।**
**अर्यमा दक्षिणे वामो स्तने तु पृथिवीधरः।**
**विवस्वानऽथ मित्रश्च दक्षवामोरुगावुभौ।।**
**आपः कण्ठे स्थितो वास्तोरापवत्सो ह्रदि स्थितः।**
**सावित्री सविता तद्वत् करं दक्षिणमाक्षितौ।।**
**इन्द्र इन्द्रजयो मेढ्रे रुद्रो वामे करेऽस्य च।**
**रूद्रदासोऽपि तत्रैव इति देवमयं वपुः।**[8]

नवनिर्माणे (स्थापत्यनिर्माणे) वास्तुपुरुषस्य आकृते निर्माणमेवं करणीयं यत् वास्तुपदविन्यासस्य भागे देवतानां स्थापना एवं स्यात्-

वास्तुपुरुषस्य मस्तके ईशदेवः दक्षिणकर्णे पर्जन्यः दक्षिणस्कन्धे जयः दक्षिणबाहौ च इन्द्रादयः पञ्चदेवाः- इन्द्रः, सूर्यः, सत्यः, भृशः, आकाशश्च स्थितास्सन्ति।

आग्नेयकोणे ऊरौ अग्निदेवः दक्षिणपादे नल्यां पूषादयः सप्त देवाः- पूषा, वितथः, गृहक्षतः, यमः, गान्धर्वः, भृङ्गराजः, यमश्च स्थितस्सन्ति।

पादद्वयोः पितृदेवः, वामपादस्य नल्यां दौवारिकः, सुग्रीवः, पुष्पदन्तः, जलाधिपः, असुरः, शोषः, पापयक्ष्मा चैते सप्त देवा विद्यन्ते, नागः मुख्य, भल्लाटः, कुबेरः शैलश्चैते पञ्च देवाः वामबाहौ अवस्थिताः वर्तन्ते।

वामस्कन्धे अदितिरेवञ्च वामकर्णे दितिविराजिते स्तः। एवं द्वात्रिंशद् देवाः वास्तुपुरुषस्य बाहेयष्वङ्गेषु अवस्थितास्सन्ति। मध्ये नाभेः पृष्ठभागे विधिर्विराजते।

दक्षिणस्तने अर्यमा वामे च पृथ्वीधर-देवः स्थितोऽस्ति। एवमेव दक्षिणे उरौ विवस्वान् वामे च उरौ मित्रदेवः अवस्थितो वर्तते। वास्तुपुरुषस्य कण्ठे आपदेवः हृदि आपवत्सः सव्ये हस्ते सावित्री सविता च विद्यमानौ स्तः।

मेढ्रे इन्द्र इन्द्रजयश्च विराजेते। वामहस्ते रुद्र-रुद्रदासयोस्थति। एवं प्रकारेण वास्तुपुरुषे पञ्चचत्वारिंशद्देवानां स्थितिरुक्तास्ति।

**वास्तुदेवानां दिग्नुसारेण पूजास्थानम्**

वास्तुमण्डले पूर्वोत्तरे कोणे, शिखी, पर्जन्यः, जयन्तः, इन्द्रः, सूर्यः, सत्यः, भृशः आकाशश्च पूज्यन्ते।

पितृदेव-दौवारिक-सुग्रीव-पुष्पदन्त-जलाधिप-असुर-शोष-पापयक्ष्मा-इत्येते अष्टौ देवाः प्रतीच्यां पूजनीयाः।

नाग-मुख्य-भल्लाट-सोम-शैल-दिति-अदिति-इत्येषां पूजा उदीच्यां करणीया।

आपदेवापवत्समोः पूजा ईशानकोणस्य मध्ये कर्तव्या। सावित्री सवित्रोः पूजा आग्नेयकोणतः एवं च इन्द्रेन्द्रजययोः पूजा नैर्ऋत्यकोणे करणीया।

अग्नि-पूषन्-वितथ-यम-गान्धर्व-भङ्गराजमृगेत्येषां अष्टौ देवानां पूजनं अवाच्यां करणीयम्।

मित्रदेवस्य पश्चिमे पृथिवीधरस्योत्तरे सर्ववास्तु प्रधानस्य ब्रह्मणः पूजनं गर्भप्रदेशे करणीयमस्ति।

वास्तुमण्डपे बाह्यतः ईशाने चरण्याः पूर्वे पिलिपिच्छाया आग्नेये विदारिकायाः तथा च दक्षिणे जम्भादेव्याः पूजनं विधातव्यम्।

नैर्ऋत्यकोणे दक्षिणे पूतनामाः पश्चिमे च पापराक्षसिकायाः तथा च अर्यमायाः उत्तरे पूजा करणीया ।

एवमेव हेतुकादयः अष्टौ बाह्यभैरवानाम् ईशानकोणतः अर्चनं करणीयम्। हेतुकः, वेतालः, अग्निः, द्विजकः, जालः, करालः, एकोहिन् भीमश्चैते अष्ट भैरवाः सन्ति। अष्ट भैरवानामुल्ले-खोऽग्निपुराणे[9] समुपलभ्यते।

देवीनां यमादिक्रूरदेवानाञ्च पूजनं माषात्रेन सुरयामिषेण च विधातव्यमन्येषां च देवानां घृतादि पक्कान्नैः स्वर्णादिभिश्च विधातव्यम्।[10]

**वास्तुपूज्यपदविन्यासः-**

वास्तुशास्त्रानुसारेण वास्तुपदविन्यासः ग्रामस्य, राजभवनस्य, नगरस्य च निर्माणे 64 पदस्य वास्तोः सर्वविधानां गृहाणां निर्माणे एकाशीतिः (80) पदस्य वास्तोःजीर्णोद्धारे नवचत्वारिंशत् (49) पदस्य वास्तोः प्रासादानां मण्डपानां च निर्माणे शतं पदस्य वास्तोः एवं च कूप-वापी-तडागादीनां निर्माणे षण्णवत्यधिकैकशतपदस्य वास्तोः पूजनं विधातव्यम्।[11]

प्रासादमण्डने ग्रन्थे एकपदात् सहस्रपदपर्यन्तं वास्तुमण्डलस्य विधानमुल्लिखितं वर्तते। अथ वास्तोः 32 मण्डलानां विधानं आकृत्यनुसारेण क्रियते। मयमते मानसारे शिल्परत्ने च द्वात्रिंशत् (32) वास्तुपदानामुल्लेखो, प्राप्यते।

यत् भूखण्डं वर्गेषु विभाजितं तत्र प्रत्येकं वर्गो वास्तुपदाख्यया व्यवहृतोऽस्ति। यदि वास्तुविन्यासेषु समसङ्ख्यामस्ति चेत् तान् चतुष्षष्टिः (64) पदस्य वास्तोः समानं तथा च विषमसङ्ख्यास्ति चेत् एकविंशतिपदवास्तोः तुल्यं देवानां स्थापनं स्यात्। मयमते ग्रन्थे द्वात्रिंशत् पदानि मण्डूकसञ्ज्ञकानि सर्वेषु च निर्माणकार्येषु उपयुक्तानि सन्ति। यतोहि एतानि तान्त्रिकविधौ आधारितानि सन्ति अतः इमानि पूजनीयानि सन्ति।[13]

**चतुः षष्ठिपदवास्तुः-**

चतुषष्ठिपदवास्तुमण्डलस्य निर्माणं ग्रामस्य नगरस्य राजभवनस्य वा प्रतिष्ठायां भवति, चतुः षष्ठिपदानि अष्टाष्टरेखासु विभाजितानि सन्ति। मध्ये ब्रह्मणः चतुष्पदानि विद्यन्ते तथा च ब्रह्माणं प्रति मुखं कुर्वन्तः मध्यस्था देवाः पूर्वे अर्यमा दक्षिणे विवस्वान् पश्चिमे मैत्रगण उत्तरे भूधरः इति इमे देवा द्वि पदेषु विभाजिताः। एवमेव आपः आपवत्सः सविता, सावित्र, इन्द्रः इन्द्रराजः रुद्रः रुद्रराजः च इमे देवाः अर्द्धार्द्धपदेषु विभाजिताः सन्ति। एते अन्तस्थाः त्रयोदश देवाः सन्ति। बाह्यस्था द्वात्रिंशत् देवाः विभाजिता वर्तते-1. शिखी, 2. अन्तरिक्षः, 3 .अग्नि, 4.भृशः 5. पितरः, 6. पापयक्ष्मा, 7. रोग, 8. दिति, 9. पर्जन्यः 10. भृशः, 11. पूषा, 12. भृङ्गराजः, 13. दौवारिकः, 14. शोषः,15. नागः,16. अदिति, अहिश्च इमे देवा डेढ़-डेढ़पदेषु कोणार्ध विभाजिताः एवं विंशतिः देवाः 1.जयन्तः, 2. इन्द्रः, 3. सूर्यः, 4. सत्यः, 5. वितथः, 6. गृहत्क्षतः,7.यमः, 8. गन्धर्वः, ९ सुग्रीवः,पुष्पदंतः, वायुः,असुरः,मुख्यः,भल्लाटः,सोमः, भुजङ्गः, द्विपदेषु स्थिताः भवन्ति। एवं प्रकारेण एतैर्बाह्यस्थैर्देवैः सह चतुष्षष्ठिपदवास्तुमण्डलस्य पूजनं क्रियते।[14]

चतुः षष्ठिपदवास्तुचक्रम्




**एकाशीतिपदवास्तुः-**

गृहनिर्माणे एकाशीतिपदवास्तु-मण्डलं पूज्यते यत् नव-नवपदेषु विभक्तं वर्तते। मध्यस्थो ब्रह्मा नवपदेषु वसति। तस्य पूर्वे अर्यमा दक्षिणे विवस्वान् पश्चिमे मित्रः उत्तरे भूधरः इमे देवा मण्डलस्यान्ते निवसन्ति। बाह्यस्थाः द्वात्रिंशत् पदानां देवा एवं सन्ति-ईशानकोणतः 1.शिखी, 2. पर्जन्यः, 3. जयन्तः, 4. महेन्द्रः, 5.रवि, 6. सत्यः, 7.भृशः, 8. आकाशोऽन्तरिक्षो वा 9. अनिलः, 10. पूषा 11. वितथः, 12. गृहत्क्षतः, 13. यमः, 14. गन्धर्वः, 15. भृङ्गराजः, 16. मृगः, 17. पितरः, 18. दौवारिकः, 19. सुग्रीवः, 20. पुष्पदन्तः, 21. वरुणः, 22. असुरः, 23. शोषः, 24. पापयक्ष्मा, 25. रोगः, 26. नागः, 27. मुख्यः, 28. भल्लाटः, 29. सोमः, 30. भुजङ्ग, 31. अदितिः, 32. दितिश्च इमे देवाः एकैकस्मिन् पदे निवसन्ति।[15] ईशानप्रभृतिषु चतुर्षु कोणेषु बाह्यतः चतस्रः देव्यः स्थापिताः करणीयाः स्युः। ताः चरकी विदारी, पूतना पापराक्षसी च। एताः पदं विना एव हविषात्रं स्वीकुर्वन्ति।[16] विश्वकर्माप्रकाशे ग्रन्थे पदविन्यासो देवस्थितिः भिन्नरूपेण कथितास्ति।[17]

एकाशीति-पद-वास्तुचक्रम्




**शतपदवास्तुः-**

शतपदवास्तुमण्डलं दश दश पदेषु विभक्तं भवति। अस्य पूजनं मण्डपनिर्माणे क्रियते। शतपदवास्तुमण्डले ब्रह्मणः षोडश पदानि भवन्ति। ब्रह्मणः मध्यस्थानां कोणानां देवताः 1.आप आपवत्सश्च, 2. सविता सावित्रश्च, 3. इन्द्र इन्द्रराजश्च, 4. रुद्रो रुद्रजयश्च एते सर्वे देवा द्वयोः पदयोः स्थाप्यन्ते एते सर्वे अन्तस्थाः देवास्सन्ति।

शतपदवास्तोर्बाह्यस्थानां द्वात्रिंशत् देवतानां स्थितिः-

ईशानकोणे- 1 शिखी, 2. पर्जन्यः

आग्नेयकोण- 3 अग्निः, 4. आकाशः

नैर्ऋत्यकोणे- 5. पितरः, 6. मृगः

वायव्यकोणे- 7. रोगः, 8. नागः

इमे देवाः सार्द्धैकपदे निवसन्ति। पूर्वे- 1. जयन्तः, 2. महेन्द्रः, 3. सुर्यः, 4. सत्यः, 5. भृशः  दक्षिणे- 1 वितथः, 2. गृहत्क्षतः, 3. यमः, 4. गन्धर्वः, 5. भृङ्गराजः, पश्चिमे- 1. शोषः, 2. असुरः, 3. वरुणः, 4. पुष्पदन्त, 5. सुग्रीवः, उत्तरे- 1.मुख्यः, 2.भल्लाटः, 3. सोमः, 4. भुजङ्गः, 5. अदितिः अन्ये सर्वे देवा एकस्मिन्नेकस्मिन् पदे निवसन्ति।[18]

**शतपद वास्तु चक्रम्**

पूर्व

उत्तर (left) — दक्षिण (right)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शिखी / दितिः | शिखी | पर्जन्यः | जयन्तः | इन्द्रः | सूर्यः | सत्यः | भृशः | अन्तरिक्षः | अन्तरिक्षा / अग्निः |
| दितिः | आपः | आपः | अर्यमा | अर्यमा | अर्यमा | अर्यमा | सवित्रः | सवित्रः | अग्नि |
| अदितिः | आपवत्सः | आपवत्सः | अर्यमा | अर्यमा | अर्यमा | अर्यमा | सावित्रः | सावित्रः | पूषा |
| भुजङ्गः | भूधर | भूधर | ब्रह्म | ब्रह्म | ब्रह्म | ब्रह्म | विवस्वान् | विवस्वान् | वितथः |
| सोमः | भूधर | भूधर | ब्रह्म | ब्रह्म | ब्रह्म | ब्रह्म | विवस्वान् | विवस्वान् | बृहत्क्षतः |
| भल्लाटः | भूधर | भूधर | ब्रह्म | ब्रह्म | ब्रह्म | ब्रह्म | विवस्वान् | विवस्वान् | यमः |
| मुख्यः | भूधर | भूधर | ब्रह्म | ब्रह्म | ब्रह्म | ब्रह्म | विवस्वान् | विवस्वान् | गन्धर्वः |
| नागः | रुद्र | रुद्र | मित्रः | मित्रः | मित्रः | मित्रः | इन्द्रः | इन्द्रः | भृङ्गराजः |
| रोगः | रुद्रराजः | रुद्रराजः | मित्रः | मित्रः | मित्रः | मित्रः | इन्द्रराजः | इन्द्रराजः | भृगः |
| रोगः / पापयक्ष्मा | पापयक्ष्मा | शोषः | असुरः | वरुणः | पुष्पदन्तः | सुग्रीव | दौवारिकः | पितरः | भृगः / पितृ |

पश्चिम

मानवानां प्रत्येकस्मिन् गृहे वास्तुपुरुषस्यापि निवासो जायते। यो गृहे निवसतां जनानां कृते शुभोऽशुभश्च भवति। विज्ञो जनः वास्तुपुरुषस्य अङ्गान् स्तम्भैर्भित्तिभिर्न पीड़येत्। वास्तुपुरुषस्य यो योऽङ्गः पीड्यते, गृहस्वामिनः तदङ्गे रोग उत्पद्यते। अतः तेषु अङ्गेषु निर्माणकार्यं सर्वथा वर्जनीयं स्यात्।[19]

पदवास्तुदेवेभ्यो बलिकर्मपूजयाः नैवेद्यैश्च भवेत्। एषां बलिकर्म प्रति देवानुसारेण पूजया नैवेद्यैश्च स्यात्। बलिकर्मणि ब्रह्मादिदेवानां क्रमेण पूजनं कर्तव्यम्।[20]

धूप-दीप-पुष्पमाला-घृत-पायस-अक्षतादिभिः इमे अर्चनीयाः।

अद्यत्वे प्रत्येकं जनः सुव्यवस्थितं जीवनं स्वास्थ्यं समृद्धिश्च काङ्क्षति यदर्थं स आत्मानं परितः एवञ्च स्वगृहं सुरक्षितं समृद्धिमयं च कर्तुमिच्छति। अतः भूमण्डलस्य प्रतिनिधिभूतं वास्तुमण्डलं निवासस्थलस्य नकारात्मकीम् ऊर्जां दूरीकृत्वा अन्तरिक्षस्य पिण्डानां देवानाञ्च सकारात्मकीमूर्जां प्रददाति। येन सुखेन तत्र निवसितुं शक्यते।

**निष्कर्षतः - वक्तुं पारयते यत् वास्तुमण्डलं वास्तुशास्त्रस्य महत्व-पूर्णङ्गं वर्तते, यत् भवन–नगर-देवालय-जलाशय- कूपादीनां निर्माणे गणितीयरूपेण वास्तुशिल्पस्यारेखीयरूपं प्रस्तौति।** यस्य मध्यतः अष्ट दिक्षु अवासीयनिर्माणं कृत्वा निवसितुं योग्यं कर्तुं शक्यते।

**सन्दर्भ ग्रन्थः -**


1 वसन्ति प्राणिनो यत्र........हिन्दीविश्वकोश, खण्ड -२९ पृ. -२३६

2 गृहं क्षेत्रमारामः सेतुबन्दतटाकमाधारो वा वास्तु....... अर्थशास्त्र, अधि. 3 अध्याय-८

3 तै(ति)लाश्चनराश्चैव यस्मिन्अस्मिन् परीस्थिति (ष्टि) ताः। तद्वस्तु सु (सू)रभिः प्रोक्तां (क्तं) तथावै वक्ष्यतेऽधुना।। मानसारः अ. -३.श्लोक-१

4 सङ्ग्रामेऽन्धकरुद्रयोश्च पतितः.. राजवल्लभवास्तु शास्त्र -द्वि.अ. श्लो- १,२

5 पञ्चचत्वारिंशशदस्य वास्तोर्देहे स्थिताः सुराः। देव्योऽष्टौ बाह्यगास्तेषांवसनाद्वास्तुरूच्यते।। वास्तुमण्डन -प्र.अ. श्लो.- १२

6 राजवल्लभवास्तु -२ अ. श्लोक. ४. पृ॰-१९३

7 मत्स्यपुराणम् २८३, २-४

8 वास्तुमण्डनं -प्र.अ. ,पृ-४१, श्लोक.-१०० -१०८

9 अग्निपुराण -१४२,१५

10 वास्तुमंडन- प्र.अ.श्लोक.-११७ -१२८

11 राजवल्लभवास्तुशास्त्र- पृ.१९५ श्लोक -१३

12 एकपदादितो वास्तूर्णवत्...क्षेत्रतुल्याकृति च, प्रसादमण्डन अ. ८

13 मयमतं – अ॰- ७ पृ॰-५४,५५

14 वास्तुसौख्यम्- अष्ठमो-भागः श्लोक-३०३,३०४

15 समराग्ङणसूत्रधारः – अ॰- ११पृ॰-१२५,१२६ श्लोक ६- १४

16 मयमत् – अध्याय-७, पृ-४५, श्लोक – ४६,४७

17 विश्वकर्माप्रकाशः- अध्याय-५ श्लोक – ८-१०

18 राजवल्लभवास्तुशास्त्र-द्वि.अ. पृ.-११५ श्लोक-१४

19 मयमतम्-अध्याय-७ पृ-४४ श्लोक-५५

20 मयमतम् अ. 8, श्लो. 1